© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# जैनन्यायदिशा मोक्षस्वरूपविमर्शः



अपूर्वा भारद्वाजः
विद्यावारिधिः, सर्वदर्शनविभागः,
श्रीलालबहादुरशास्त्रराष्ट्रीयसंस्कृतवद्यापीठम्

शोधलेखसारः – जैनर्षिदेशनानुसारमात्मनो मोहरागद्वेषविहीना सर्वज्ञानसंयुताऽऽतुलानन्दपरिपूर्णनिर्मलावस्था हि मुक्तिर्भवति। सा पुनः सर्वदुःखनिर्वृत्तिस्वरूपा कर्मबन्धनविभावशून्या च ज्ञेया। यावदेव जीवः परद्रव्यादिभ्यो ममत्वं विहाय स्वस्वरूप एव निमज्जत्यर्थात् सर्वपरपदार्थान् विस्मृत्य स्वस्वभावमेव संस्मृत्य स्वाश्रिततयैव निजात्मानं जानाति श्रद्दधाति चरति च तावदेव सर्वकर्मभ्यो मुक्तीभूयानन्दं चानुभूय मोक्षं लभते।

मुख्यशब्द :- मोक्षः, शब्दः, लोकः, मोक्षमार्गः, दर्शनं, प्रशस्तं ज्ञानं, जीवः

भावार्थके 'घञ्'- प्रत्यये निष्पद्यते मोक्षोऽयं शब्दः। करणार्थकेऽपि घञि मोक्षते दुःखम् अनेन इत्यस्मिन् अर्थे जायते। परञ्च सर्वत्रापि करणार्थकप्रत्ययस्यैव स्वीकारः लोके शास्त्रे च दृश्यते। किन्तु महाभारतादिषु पौराणिकग्रन्थेषु बह्वत्र भावार्थकः एव दृश्यते, यथा-

**न मोक्षो नभसः पृष्ठे न पाताले न भूतले।**
**सर्वाशासंक्षये चेतः क्षयो मोक्ष इति श्रुते।।** इति

तद्वदेव गीतायामपि-

**जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।**
**ते ब्रह्म तद्विदुः कृत्स्नं अध्यात्मं कर्म चाखिलम्।।**

इत्येवं मोक्षस्य पौराणिकी दृष्टिः दार्शनिकदृष्टिश्च।

जैनमतम्-

जैनर्षिदेशनानुसारमात्मनो मोहरागद्वेषविहीना सर्वज्ञानसंयुताऽऽतुलानन्दपरिपूर्णनिर्मलावस्था हि मुक्तिर्भवति। सा पुनः सर्वदुःखनिर्वृत्तिस्वरूपा

IJSRST1845596 | Received : 02 April 2018 | Accepted : 25 April 2018 | March-April-2018 [(4)7 | 753-758 ]

कर्मबन्धनविभावशून्या च ज्ञेया। आकुलतास्वरूपं दुःखं साम्प्रतमस्माभिर्यदनभूयते शारीरिकेन मानसिकेन वा कष्टेन। तद्वस्तुतो जीवस्याहंकारत्वेन ममकारत्वेन वा परसत्तासु प्रतीतिपरिणामः द्रव्यभावकर्मणां चिदचित्पदार्थानां भोगादिविषयाणां वाश्रितत्वपरिणामः स्वस्वरूपविस्मरणपरिणामाश्चैव स्वीकृतो यतो हि एतैरेव जीवपरिणामैः जीवो व्याकुलीभूय दुःखमनुभवति। दुःखभावायावश्यंभावितया स्वात्मनः आकुलता परिहरणीया। आकुलतायुते हि जीवे रागद्वेषादयो जायन्ते तेभ्यश्चैव ज्ञानावरणादीनां द्रव्यकर्माणि शरीरादीनि नोकर्माणि च जीवेन सह बन्धभावं यान्ति। यावदेव जीवः परद्रव्यादिभ्यो ममत्वं विहाय स्वस्वरूप एव निमज्जत्यर्थात् सर्वपरपदार्थान् विस्मृत्य स्वस्वभावमेव संस्मृत्य स्वाश्रिततयैव निजात्मानं जानाति श्रद्दधाति चरति च तावदेव सर्वकर्मभ्यो मुक्तीभूयानन्दं चानुभूय मोक्षं लभते। मोक्षो मुक्तिः निःश्रेयसं निर्वाणमिति नामान्तरम्। शास्त्रवचोभिरपि तत्स्वरूपमित्थं ज्ञातुं शक्यते।

तत्रचार्येण उमास्वामिना निगदितं— 'बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः'[1] इति। पूज्यपाददेवनन्दिना च सर्वार्थसिद्धौ पुरस्कृतं- 'निरवशेषनिराकृतकर्ममलकलङ्कस्याशरीरस्यात्मनोऽचिन्त्यस्वाभाविकज्ञानादिगुणमव्याबाधसुखमात्यन्तिकमवास्थान्तरं मोक्षः'[2] 'सर्वकर्मविप्रमोक्षो मोक्ष'[3] वेति।

स्वहिताकाङ्क्षी कश्चन पुरुषः एव मुमुक्षुः इति उद्घोषयन् सर्वार्थसिद्धिकारः- कश्चिद् भव्यः प्रत्यासन्ननिष्ठः प्रज्ञावान् स्वहितमुपलिप्सुः इति प्रोवाच हितशब्देन आत्मने हितम् इत्यवगन्तव्यम्, तादृशहितसिद्धिरेव मोक्षः। तल्लक्षणमुच्यतं— "निरवशेषनिराकृतकर्ममलकलंकस्याशरीरस्यात्मनोऽचिन्त्यस्वाभाविक ज्ञानादिगुणमव्याबाधसुखमात्यन्तिकमवस्थान्तरं मोक्ष"[4] इति अर्थात् एका अवस्था या अशेषैः निराकृतैश्च मलकलङ्कयुक्तैः कर्मभिः रहिता अशरीरावस्था, अचिन्त्यावस्था, स्वाभाविकज्ञानादिगुणयुक्तावस्था, अविच्छिन्नात्यन्तिकसुखरूपा परा च। इयं अवस्था वाग्भिरपि अस्पर्श्या, वाचापि प्रतिपादितुं न शक्या इत्यर्थः। अतः अन्यथा एव परिकल्पयन्ति इति, यथा- 'चैतन्यं पुरुषस्य स्वरूपम्, तच्च ज्ञेयाकारपरिच्छेदपराङ्मुखम्'[5] इत्युक्त्वा 'बुद्धयादि- वैशेषिकगुणोच्छेदः पुरुषस्य मोक्षः'[6], इत्युक्तम्। अर्थात् पुरुषः चेतनयुक्तः, अज्ञेयः, अनाकारकश्च, स च सदपि असदेव,

निराकारत्वादिति। अनेन इदम् अवगन्तव्यं भवति यत् निराकारः जैनमते असदेव। तदनु तादृशस्य पुरुषस्य बुद्धयादिविशेषगुणैः परिच्छेदः एव मोक्षः।

अयमपि मोक्षः असदेव यतो हि विशेषलक्षणशून्यस्य अवस्तुत्वम्। 'प्रदीपनिर्वाणकल्पमात्मनिर्वाणम्'[7], अर्थात् दीपनिर्वाणमिव आत्मनिर्वाणम्, स एव मोक्षः। स च गर्दभविषाणमिव। एवमेव तेषां वादः।

पुनश्च भट्टाकलंकदेवेनाप्यात्यन्तिकसर्वकर्मनिक्षेपोमोक्षो[8] भणितः। मुनिराजजोइन्दुवचनानुसारेण कर्मकलंकविमुक्तानां जीवानां यो हि परमात्मलाभो भवति स एव मोक्षो ज्ञेयः[9]। महर्षिपद्मप्रभलधारिदेवाश्च प्राहुः- 'मोक्षः साक्षादखिलकर्मप्रध्वंसनेनासादितमहानन्दलाभः'[10] इति। पुनश्च, अध्यात्मरसपुरस्कर्तॄणाममृतचन्द्रसूरिणां वचनेनात्मबन्धयोर्द्विधाकरणं मोक्षो मन्तव्यः[11]। अपि च, जीवेन सह संजातस्य समुद्भवतश्च द्रव्यभावतया परिगणितस्य सर्वविधबन्धस्य विध्वंसो मोक्षो ज्ञेयः स च संसरणस्वरूपस्य जन्मनः प्रतिपक्षभूतोऽनन्तरदर्शनवीर्यादिगुणोपेतः चिदानन्दमयः जन्मक्लेशपरिच्युतोऽपुनर्भवस्वरूपेण चात्यन्तिको भवतीति शुभचन्द्राचार्याः[12]।

श्रीमाइल्लधवलेन द्रव्यस्वभावप्रकाशनयचक्राभिधेये स्वीये ग्रन्थे प्रोक्तं यदात्मस्वभावाविरुद्धो हि मोक्षः संचितानां मूलोत्तरप्रकृतीनां सर्वथा मोचनमेवेति ज्ञेयम्[13]। तथा च, मुनिः नेमिचन्द्रदेवः द्रव्यसंग्रहे लिखितवान् 'सर्वविधकर्मणां क्षयाय हेतुभूत आत्मनः परिणामो भावमोक्षो भवति। ततश्च तेषां कर्मणां पृथग्भावो द्रव्यमोक्षः'[14] इति। अत्र तट्टीकाकर्तुः श्रीमद्ब्रह्मदेवसूरिणोऽभिप्रायोऽपि ज्ञातव्यः। तद्यथा- यद्यपि सामान्येन निरवशेषनिराकृतकर्ममलकलङ्कस्याशरीरस्यात्मन आत्यान्तिकस्वभाविकाचिन्त्याद्भुतानुपमसकलविमलकेवलज्ञानाद्यनन्तगुणास्पदम-वस्थान्तरं मोक्षो भण्यते तथापि विशेषेण भावद्रव्यरूपेण द्विधा भवतीति वार्तिकम्।

तद्यथा- 'णेयो स भावमुक्खो' ज्ञातव्यः सः भावमोक्षः। स कः? 'अप्पणो हु परिणामो' निश्चयरत्नत्रयात्मककारणसमयसाररूपः स्फुटमात्मनः परिणामः। कथंभूतः? 'सव्वस्स कम्मणो जो खयहेदू' सर्वस्य द्रव्यभावरूपमोहनीयादिधातिचतुष्टयकर्मणो यः क्षयहेतुरिति। द्रव्यमोक्षं कथयति। 'दव्वविमुक्खो' अयोगिचरमसमये द्रव्यविमोक्षो भवति। कोऽसौ? 'कम्मपुहभावो'

टंकोत्कीर्णशुद्धबुद्धैकस्वभावपरमात्मन आयुरादिशेषाघातिकर्मणामपि च आत्यन्तिकपृथग्भावो विश्लेषो विघटनमिति[15]।

पुनश्च आचार्य शिवार्यरचितायाः भगवती-आराधनायाः विजयोदयाटीकायामपराजितसूरिणाऽप्यवमेव मोक्षस्वरूपं समभिव्यक्तम्। यथा- मोक्ष्यते अस्यते येन मोक्षणमात्रं वा मोक्षः। निरवशेषाणि कर्माणि येन परिणामेन क्षायिकज्ञानदर्शनयथाख्यातचारित्रसंज्ञितेन अस्यते स मोक्षः विश्लेषो वा समस्तानां कर्मणामिति[16]। महर्षिजयसेनाचार्येणापि पंचास्तिकायस्य तात्पर्यवृत्तिटीकायां भावमोक्षस्य द्रव्यमोक्षस्य च स्वरूपं प्रतिपादितमेवम्- 'कर्मनिर्मूलनसमर्थः शुद्धात्मोपलब्धिरूपजीवपरिणामो भावमोक्षः, भावमोक्षनिमित्तेन जीवकर्मप्रदेशानां निरवशेषः पृथग्भावो द्रव्यमोक्षः इति[17]। पुनश्च प्रवचनसारस्य टीकायामपि सूरिणाऽमुनाऽयमेव भावः प्रकाशितः यथा 'शुद्धोपयोगलक्षणो भावमोक्षस्तद्बलेन जीवप्रदेशकर्मप्रदेशानामत्यन्तविश्लेषो द्रव्यमोक्षः'[18] इति।

अधुना मोक्षप्राप्त्युपायं किञ्चित् अनूद्यते। 'ज्ञानादेव चारित्रनिरपेक्षात्तत्प्राप्तिः, श्रद्धानमात्रादेव वा, ज्ञाननिरपेक्षाच्चारित्रमात्रादेव, इति, इदं तावत् सुस्पष्टम्। किन्तु 'व्याधि-अभिभूतस्य तद्विनिवृत्त्युपायभूतभेषजविषयव्यस्तज्ञानादिसाधनत्वाभाववद् व्यस्तं ज्ञानादिः मोक्षंप्रति उपायो न भवति'[19] इति एतन्नयः। अर्थात् व्याधिप्रताडितस्य कस्यचिज्जनस्य व्याधिविनिवृत्तिउपायभूतानाम् औषधादीनां ज्ञानमात्रेण अरोगता साधयितुम् अशक्यत्वात् क्रियासमन्वयस्य नितरां यथा आवश्यकता तद्वदेव केवलेन ज्ञानेन मोक्षभावोऽपि साधयितुम् अशक्यः। अतएव 'ज्ञाननिरपेक्षात् चारित्रमात्रादेव, इत्युपन्यस्तमः, यदि बोधयति ज्ञानेन विनापि चारित्रमात्रात् मोक्षसंसिद्धिरिति। अस्य बींज तु-

**"सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः।।"[20]**

इति सूत्रम्। मोक्षमार्गः त्रिकरणम्। किं तत् त्रितयम् इति चेत् उच्यते सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रं च। द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बद्धयते इति न्यायान्वितं सूत्रं, सूत्रनिष्ठं सम्यगिति पदं वा। तच्च पदं किमर्थकम् इत्यत्र न तावत् व्याकरणसिद्धलक्ष्यार्थावबोधकम् अपितु रूढ्यर्थावबोधकम्, रूढ्यर्थस्तु प्रशंसारूपः। अतः प्रशंसनीयं दर्शनं, प्रशस्तं ज्ञानं, प्रशंसनीयं

चारित्रम् इति भावार्थः। सम्यग्दर्शनम् इत्यस्याशयः- पदार्थानां यथार्थज्ञानसहितं दर्शनम्, यथार्थं नाम याथात्म्यम्। ज्ञानं नाम- येन येन प्रकारेण जीवादयः पदार्थाः व्यवस्थिताः तेन तेन एव रूपेण अवगमः, सम्यगिति पदं तु विमोह-संशय-विपर्यय व्यवच्छेदकम्। तदनु चारित्रं नाम संसारकारणानां प्रति सम्यज्ज्ञानवतः कर्मणाम् आदाननिमित्तात्मकानां क्रियोपरमः इति, सम्यगिति तु अज्ञानपूर्वक-आचरण-निवृत्त्यर्थम्[21]। एतन्मते चारित्रं क्रियोपरमपर्यायः।

एतदनन्तरं दर्शन-ज्ञान-चारित्रविग्रहाः उच्यन्ते। ‘‘दृश्यतेऽनेन दृष्टिमात्रं वा दर्शनम्। ज्ञायतेऽनेन ज्ञप्तिमात्रं वा ज्ञानम्। चर्यतेऽनेन चरणमात्रं वा चारित्रम्।’’[22]

ननु स एव कर्त्ता स एव करणम् इति युगपत् एकस्यैव ज्ञानवतः धर्मद्वयम् इत्यापत्तिः, दर्शनेन ज्ञानं इत्यत्र दर्शनं करणं तेन च ज्ञातुः बोधः इत्यस्यां स्थितौ समादधाति- ‘स्वपरिणामपरिणामिनोर्भेदविवक्षायां तथाभिधानात्’[23] यथा- अग्निः दहति ईन्धनं दाहपरिणामेन इति।

सन्दर्भग्रन्थसूचिः-


1. तत्त्वार्थसूत्रम्, आचार्यः उमास्वामि . 10.1
2. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . 1.2
3. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . 1.1
4. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 1
5. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 1
6. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 2
7. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 2
8. तत्त्वार्थराजवार्तिकम्, अकलङ्कदेवः . 1.1.39
9. जैनदर्शनसारः, चैनसुखदासः . पृ. 3
10. तात्पर्यवृत्तिटीका, महर्षिजयसेनाचार्यः . 4
11. तत्त्वार्थसारः, अमृतचन्द्रसूरि
12. जैनदर्शनसारः, चैनसुखदासः . पृ. 4

13. जैनदर्शनसारः, चैनसुखदासः . पृ. 5
14. वृहद्द्रव्यसंग्रहः, नेमिचन्द्रदेवमुनिः . 37
15. वृहद्द्रव्यसंग्रहः, नेमिचन्द्रदेवमुनिः . टी. 37
16. भगवती आराधना, आचार्य शिवार्यः. 37
17. तात्पर्यवृत्तिटीका, महर्षिजयसेनाचार्यः . 108
18. तात्पर्यवृत्तिटीका, महर्षिजयसेनाचार्यः . 84
19. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 2
20. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 4
21. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 4
22. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 4
23. सर्वार्थसिद्धिः, देवनन्दीपूज्यपादाः . पृ. 5